नं. ६ शाक्तानन्द तरंगणी

शाक्तानन्दतरंगणी

नं० १४६८



नं २४६८ क
शाक्तानंद तरंगि
८९ पत्रा
तन्त्र

5915
F- 89 Complete

हक्का नंद तरंगिणी

शा॰ त॰ १

ॐ नमः परदेवतायै ॐ गुणसाम्यप्रकृतिं नित्यां परमात्
मस्वरूपिणीम् नमस्ते भक्तिसंलब्ध्यै शाक्तानन्दतरं
गिणी अथ का प्रकृतिः तथा हि गुणत्रयसाम्याव
स्था प्रकृतिः तथा चोक्तं सत्त्वरजस्तम इति गुणत्रय
मुदाहृतं साम्यावस्थितिरेतेषामव्यक्तिं प्रकृतिं विदुः
सैव मूलप्रकृतिः स्यात् प्रधानं पुरुषोऽपि च अत्रा
पि सत्त्वं रजस्तम इति गुणानां त्रितयं प्रिये यदा सा प
रमा शक्तिर्गुणाधिष्ठानमाचरेत् प्रकृतित्वं भजेत्तस्याः
पुरुषः स्यात्सदाशिवः नित्याशाश्वत्यमाह शक्तिया
मले ब्रह्मविष्णुशिवादीनां भावो यस्यां निजेच्छया
पुनः प्रलीयते यस्यां नित्या सा परिकीर्तिता परमश्चा
सौ आत्मा चेति परमात्मा उत्कृष्ट आत्मा इत्यर्थः
उत्कृष्टत्वं च स्वेच्छया ब्रह्मविष्णुशिवादिशरीरमुत्पाद
नं यते अथवा तत्तदिन्द्रियरहितोऽपि तत्तदिन्द्रियज
न्यप्रत्यक्षाश्रयः तथा चोक्तं श्रुतिः अपाणिपादो जव
नो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः स वेत्ति वि
श्वं न हि तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं प्रधानम् नित्य
ज्ञानकृत्याश्रयः परमात्मा स च लाघवात् एक एव
नव जन्यज्ञानप्रकृत्याश्रयो जीवात्मा स चानन्तः मनु
ष्यपशुपक्ष्यादिभेदात् तथा शिवविष्णुगणादीनां शरी

इमे द्वात्रनानापर्वाप्ततइतिवाच्यम् अन्नादिग्रहणेपिगृही
तशरीराणांनानात्वेनतत्रनानात्वभ्रमात् नहिभ्रमा
त्सत्त्वसिद्धिरिति । उल्लासेप्रथमेवक्ष्येशारीरंकर्मसं
भवं दीक्षाद्वितीयेवक्ष्यामितृतीयेयोगनिर्णयम्
प्रातःकृत्यंचतुर्थेतुप्रासनंपंचमेतथा अंतर्यागवि
धिंषष्ठेनित्यपूजांचसप्तमे वर्णमालाविधानंतुनव
मेजपलक्षणम् महासेतुंचमेतुंचकुल्लुकांदशमेतत
था कुलस्यशोधनंरुद्रेद्वादशेचपरस्क्रियाम् संस्का
रंयंत्रराजस्यबलिदानंत्रयोदशे फलंचतुर्दशेचैवउ
पचारादिदानजम् नामस्मरणपूजादिफलंपंचदशे
तथा कलौसंसर्गदोषादिप्रायश्चित्तंतुषोडशे कुंडं
सप्तदशेचैवहोमंचाष्टदशेततः गुरुपादरजोध्या
नात्कृतउल्लासनिर्णयः ज्ञानभाष्ये देव्युवाच शारी
रंकीदृशंनाथमूर्तिर्वाकेनकर्मणा इदानींश्रोतुमि
च्छामिकृद्धिमेपरमेश्वर ईश्वरउवाच शृणुदेविप्र
वक्ष्यामिशारीरंकर्मरूपिणम् रजस्वलाचयानारीवि
शुद्धापंचमेदिने पीडिताकामबाणेनततःपुरुषमी
हते भगलिंगसमायोगात्वैमिथुनेस्यात्तथातयोः अन्यो
न्यस्पर्शनादेविजायतेचमहत्सुखं तत्तेचतथारेतः प्रा
णापानविसंश्रितिः क्षितिरापस्तथातेजोवायुराकाश

शा· मेवच सर्व्वेषांतनं प्राउः स्यादहस्य रक्तवीजयोः नाभिरंध्रेन
ने· टादेविभ्रमतेच समीरणेः कुंभकारोयथावके घटतेवच
२ टादिकं तथासमीरणागर्भेः घटतेप्राणिनांतनुं कललं
चैकरात्रेण बुद्बुदं पंचमेदिने शोणितं दशरात्रेन मांसपिं
डंचतुर्दशे मासैकेः पिंचसंपूर्णेमांसपिंडेऽङ्कुरायते
श्रोत्रेमसंजायते वीजेऽवलांडः सहसांकुरः तस्यमध्येहृस
हंसकंकालदंडरूपिणः चराचराणांसर्व्वेषांदेवादीनांवि
शेषतः आलयः सर्वभूतानांमेरोरभ्यंतरेऽपिच प्रदीप
कलिकाकारं जीवंहृदिसदास्थितं रज्जुवद्धोयथाश्ये
नोगतोऽप्याकृष्यतेपुनः गुणवद्धस्तथाजीवः प्राणा
पानेनकृष्यते जीवस्यपरमेशानिपरिवारगणंशृणु
श्रोत्राणिनासिकेकर्णौजिह्वाचकमलानने हस्तौपा
दौमहेशानिगुह्योपस्थौक्रमात्प्रिये नाभिस्थपरमेशा
निमनस्थपरमेश्वरि जाग्रत्स्वप्नसुषुप्तस्थवस्थाचेतिहृदि
धुंमस्थिता इन्द्रियाणांचसर्व्वेषांमनःपरमसारथिः
पापैःपुण्यैर्महेशानिवंधःस्यादात्मनःप्रिये संगात्मा
सदसत्कर्मजीवः सर्वं करोतिहि शुद्धसत्वात्मकोजी
वःसदसत्कर्मवर्जितः मनसाजीवसंयोगात्सका·
र्यंकुरुतेसदा मासद्वयेतुसंपूर्णेमेदस्तत्रप्रजायते
मज्जास्थीनित्रिभिर्म्मासैः केशास्त्वक्चचतुर्थये ॥

कर्णाक्षिनासिकावक्त्रं कंठोदरं वपंचमे शुक्राडुत्पद्य
ते रक्तं रक्ताद्भिन्नसमुद्भवः प्राणतो वायुरुत्पन्नः का
लाग्निः स्यादपानतः शुक्रतो नाडिको सन्ति शुक्राद
ग्निसमुद्भवः मांसतश्चमलो सन्ति मज्जा वापित्ततोभ
वेत् वायुना प्राणेनि ष्पत्तिरपानादग्निसंभवः शुक्री
णास्यादिना जिह्वा नासिका सर्वेदेहिनां रक्ताडुत्पद्य
ते नेत्रं वामं चैव तद्दक्षिणं प्राणाडुत्पद्यते श्रूवं घ्राण
रंध्रहृद्यं तथा षडेभ्युद्भवति तथा पादौ सर्वांगानि च सप्त
मे संधिः संपूर्णतां याति अष्टमे मासि वै ततः सुरा
यस्तु कंकालस्यारभ्य गुदमूलतः द्वाविंशज्ज्ञानवि
ज्ञेया ग्रंथिनावहंते सदा तस्य मध्ये सदा सर्वा नाड्य
स्तत्र व्यवस्थिताः इडा च पिंगला चैव सुषुम्ना च तृती
यिका गांधारी हस्तिजिह्वा च पूषा चैव यशस्विनी अ
लंबुषा कुहूश्चैव शंखिनी दशमी तथा अन्याश्च नाडि
काः सूक्ष्माः सहस्राणां हि संमिताः इडा च वामभागे तु
दक्षिणे पिंगला तथा ब्रह्मरंध्रे सुषुम्ना गांधारी वा
मचक्षुषि दक्षिणे हस्तिजिह्वा च पूषा च कर्णे दक्षिणे
वामे यशस्विनी चैव मुखे चालंबुषा तथा कुहूश्च लिंग
मूले च शंखिनी शिरसोपरि एवं द्वारं समाश्रित्य तिष्ठंति
दशनाडिकाः क्षितिश्च वारि तेजश्च पवनाकाशमेव च

शा॰ तं॰ ३ स्थैर्यंगताइमेपंचवाह्याभ्यंतरएवच अस्थिचर्मतथा
नाडीलोममांसस्तथैवच एतेपंचगुणाःप्रोक्ताःपृथि
व्यांचसमवस्थिताः मलमूत्रंतथाशुक्रंश्लेष्माशोणित
मेवच एतेपंचगुणाःप्रोक्ताःआपस्तत्रसमवस्थिताः क्षु
धातृष्णातथानिद्राश्रमोरूःकांतिरेवच एतेपंचगुणाः
प्रोक्तास्तेजस्तत्रसमवस्थिताः विवोधाद्वेपणाकुंचधा
रणंतर्पणंतथा एतेपंचगुणाःप्रोक्ताःमारुतेचसमव
स्थिताः रागद्वेषश्चमोहश्चभयंलज्जातथैवच एते
पंचगुणाःप्रोक्ताआकाशेचसमवस्थिताः प्राणापा
नसमानश्चोदानव्यानौचवायवः नागःकूर्मोऽथ
कृकरोदेवदत्तोधनंजयः एतेदशगुणाःप्रोक्तास
र्वेप्राणसमात्मनः हृदिप्राणोवसेन्नित्यमपानोगु
दमंडले समानोनाभिदेशेचउदानःकंठदेशतः व्या
नःसर्वशरीरेतुप्रधानाःपंचवायवः ब्रह्मांडेयेगुणाः
संतितेतिष्ठंतिकलेवरे पातालमृत्यरंलोकाश्चादिप्रा
दिनवग्रहाः नागाश्चसर्वदेहिनांपिंडमध्येसमवस्थिताः
पादाधस्त्वतलंविद्यात्ऊर्द्ध्वेवितलंतथा जानुनोःसु
तलंचैवतलंचसंधियोरूर्योः तलातलंगुह्यमध्ये
लिंगमूलेरसातलं पातालंकटिसंधौचपादादौल
तयेद्बुधः भूर्लोकोनाभिदेशेतुभुवर्लोकस्तथाहृदि

स्वर्लोकः कंठदेशेतु महर्लोकस्तु चक्षुषि जनलोकस्तु
ऊर्द्ध्वे च तपोलोको ललाटके सत्यलोको महापद्मे नाभौ भुव
नानि चतुर्दश त्रिकोणे च स्थितो मेरु रुद्रलोके च म
न्दरः कैलाशो दक्षिणे कोणे वामकोणे हिमालयः
विन्ध्यो विष्णुस्तु ऊर्द्ध्वे च सप्तैते कुलपर्वताः अस्मिन्स्था
ने च द्वीपो जंबुद्वीपो व्यवस्थितः मांसेषु च कुशद्वीपः
क्रौंचद्वीपः शिरासु च शाकद्वीपः पयोरक्ते प्राणिनां
सर्वसंधिषु तद्वच्छाल्मलीद्वीपः सच्च लोमसंच
यः नाभिस्थः पुष्करद्वीपः सागरस्तदनंतरं लवणोद
स्तथा मूत्रे शुक्रे क्षीरोदसागरः मज्जा दधिसमुद्रश्च त
दूर्द्ध्वे घृतसागरः रसोदके रसः प्रोक्तः इति सप्तकांतरे
पाठः वातिधिः कञ्चरः प्रोक्तः रक्तः स्यात्कटिशोणितम
शोणितेषु सराः प्रोक्ताः ख्याताः सागरकीर्तिताः ग्रहा
णां मंडले चैव शृणु त्वं सामि पार्वति नादचक्रे स्थितः
सूर्यो विन्दुचक्रे च चन्द्रमाः लोचने मंगलः प्रोक्तो हृ
दि सोमसुतस्तथा उदरे च गुरुश्चैव शुक्रे शुक्रस्तथै
व च नाभिचक्रे स्थितो मन्दो मुखे राहुः स्थितः सदा पा
दे नाभौ च केतुश्च शरीरे ग्रहमंडले नवमे मासि गर्भ
स्थः सर्वान्संस्मरते मनः नवद्वारपुरे देही समयान्य
विकारकान् सर्वखंडं समंकृत्वा भुक्त्वै च हृदयमंतरेण

शा. तं. ४

स्वकृतं दुष्कृतं चैव यत्कृतं पूर्वजन्मनि तत्सर्वं सफलं
ज्ञात्वा दुःखेनायस्तथोद्भवः गर्भे तस्य प्रविष्टस्तु तिमिरे घो
रदर्शने यदि माता स्वं विभुंक्ते अन्नपानादिकं ततः ज
नमानाभिदेशात्तु सुवेदना पिवत्यसौ ततो जीवति ग
र्भेऽसौ अन्यथा मरणं भवेत् अभ्यस्यामि शिवं ज्ञानं सं
सारार्णवतारणं चिरयोगी ततो भूत्वा मुक्तो भास्यामि त
त्त्वणं यतस्मिन्नंतरे देवि विघ्नेभो गर्भसंकटे निःसार्य
ते तदा बालः प्रबलैः सूतिमारुतैः पतितोऽपि न जाना
ति मूर्छितोऽपि ततस्सूतः सूतिवातगभीरेण योनि
रंध्रस्य पीडनात् विस्मृतं सकलं ज्ञानं गर्भे यच्चिंतितं
हृदि यथा भवति तत्त्वेषु सन्नभूतेषु पीडनात् मातरं
स्मते निसंतु भुक्त्वा दृढवेदने रक्ताधिका भवेन्नारी भ
वेच्छुक्राधिकः पुमान् नपुंसकं ततो जातं साम्ये च रज
वीजयोः पंचैतान्यपि सृज्यंते गर्भस्थस्यैव देहिनः
आयुः कर्म च वित्तं च विद्या निधनमेव च बालकश्च
शिशुश्चैव पौगंडः कौशोरकस्तथा अतः परं तु युवकः
प्रौढश्चैव ततः परम् अतिप्रौढस्तथा वृद्धश्चातिवृ
द्धस्ततः परं पलितं मरणं चैव अवस्थाः परिकीर्ति
ताः तत्क्षणादेव गृह्णाति शरीरं नतिवाहिकम्।
केवलं तन्मनुष्याणां नामैषां प्राणिनां क्वचित्

प्रतिदेहमिति प्रोक्तं कस्मादेव न संशयः ततः सपिण्डीक
रणे वाप्यैवं समन्कृते तेन वै पूर्णे संवत्सरे देहमर्त्यः सं
संप्रपद्यते ततः स नरके याति स्वर्गं वा स्वेन कर्मणा
तत्क्षणात्स्वस्थानात् देवत्वमथ मानुष्यं पशुत्वं पा
क्षित्वं तथा कृमित्वं स्थावरत्वं च जायते जंतुः कर्मभिः
स्थावरा जंगमाद्याश्च पक्षिणः पशवो नराः जायंते
वा म्रियंते वा संसारे दुःखसागरे कर्मणा जायते जं
तुः कर्मणैव प्रलीयते देहे विनष्टे तत्कर्म पुनर्देहं प्र
लभ्यते यथा धेनुसहस्रेषु वत्सो विन्दति मातरं
तथा शुभाशुभं कर्म कर्तारमनुगच्छति प्राक्तनेव
लवत्कर्म कोऽन्यथा तत्करिष्यति देहः कर्मात्मकः
प्रोक्तस्तत्र हि विप्रतिष्ठितं कर्मयोगात्तु रूपेण निर्मले
विधिमादिशेत् चराचरमिदं देवि सर्वं कर्मात्मकं प्रि
ये माता कार्यं पिता कर्म कर्मैव परमो गुरुः स्वर्गं
वा नरकं वापि कर्मणैव लभेन्नरः सुखं दुःखं समश्नी
यैः पुण्यैः पापैर्निबंधितैः ततस्त्यजति युते देहं संभोग
वशात्कर्मजं अत्र जन्मसहस्रेषु सहस्रैरपि पार्वति
कदाचिल्लभते जंतुर्मानुष्यं पुण्यसंचयात् निद्रा च मै
थुनाहाराः सर्वेषां प्राणिनां समाः ज्ञानवान्मानवः प्रो
क्तो ज्ञानहीनः पशुः प्रिये संपदं स्वप्नसंकाशं यौवनं कु

पु समोपमं नहि दृष्टमामुष्य यस्य ज्ञानं नलताभृतिः च
ं तुरशीतिलक्षेषु शरीरेषु शरीरिणः न मानुष्यं विनाम
के न्यत्र तत्त्वज्ञानं तु लभ्यते ब्रह्मविष्णुमहेशादिदेवताभूत॥
५ जातयः नाशमेवानुधावंति तस्माच्छ्रेयः समाचरेत्
5 स्वदेहधनदारादिनिरताः सर्वजंतवः जायंते च म्रियं
ते च हा हंताज्ञानमोहिताः प्रभवं सर्वदुःखानामाश्रयं
सकलापदां स्थालयं सर्वपापानां संसारं वर्जयेत्प्रिये
प्रतिक्षणमयः कालः क्षीयमाणो न लक्ष्यते आमकुं।
भः इवांभस्थो विशीर्णः सन्विभाव्यते इदमेकलत्रं
मे धनं मे वा यथावाश्वमे लपंतमिति मर्मंतमतिकाल
वृको हरः पृथिवी दह्यते येन मेरुश्चापि विशीर्यते शु
ष्यते सागरजलं शरीरस्यापि का कथा मोहपाशमयैः पा
शैर्नरो बद्धो हि तिष्ठति स्त्रीधनादिषु संसक्तो मुच्यते
न कदाचन अप्रसक्तदेहकर्माणि महादुःखानि भुंजते
परज्ञानिनो देवि यां सायांति पुनः पुनः अवंधयवंध
नं संगाहतसंगमहाविषं सत्संगस्य विवेकस्य तिस्य
यनयनद्वयं यस्य नास्ति नरः सोऽन्धः कथं न स्यादनाकु
लः द्वे पदे मोक्षबंधाय निर्ममेति ममेति च ममेति ब
ध्यते जंतुर्निर्ममेति प्रतिवध्यते समसंध्यामनार्तयो
विमुक्ति निर्ममेति च मांसलुब्धो यथा मत्स्यो लोह

पृष्ठं न पश्यति स्वबालव्यसनस्थादेही यमवार्त्तां न पश्य
ति कृत्वा पापविनिर्भिन्नं सिक्तं विषयसर्पिषा रागद्वे
षानलैः पक्वं मृत्युरश्नाति मानवं स्वदेहमपि जीवेऽयां
सकायाति कुलेश्वरि स्त्रीमात्रधनपुत्रादि संभ्रमः केन
हेतुना शतं जीवति सर्वस्वं निद्रा तस्यार्द्धहारिणी बा
ल्यभोगजरादुःखैर्विशिष्टं तदपि निष्फलं दुःखमूलं हि संसा
रः स यस्यास्ति स दुःखितः तस्य त्यागः कृतो येन स सुखी
नापरः क्वचित् प्रभाते मलमूत्राभ्यां मध्याह्ने क्षुत्पिपासया
रात्रौ मदननिद्राभ्यां बाध्यन्ते मानवाः सदा दिव्यौषधं न
सेवेत महाव्याधिविनाशनं तद्व्याधिवर्द्धनापथ्यं कु
र्वन्ति बहुमोघजं स्वकर्मफलदेष्ट्यत्वा दुष्कर्माणि करो
तियः कामयेत्तु समाकृष्यार्कदीरं समायाति श्वतिमा
नि शरीराणि विभवो नैव शाश्वतः नित्यं सन्निहितो मृ
त्युः कर्तव्यो धर्मसंचयः अध्रुवेण शरीरेण प्रतिक्षणवि
नाशिना यो ध्रुवं नार्जयेद्धर्मं स मर्त्यो मूढचेतनः नामुत्र
हि सहायार्थं पिता माता च गच्छति नापि पुत्रो न वा ज्ञाति
र्धर्मस्तिष्ठति केवलं पुत्रदारादिभिः पाशैः पुमान्वै यो न
मुच्यते पंडितैश्चैव मूर्खैश्च बलिभिर्दुर्बलैरपि ईश्वरैश्च द
रिद्रैश्च मृत्योः सर्वत्र तुल्यता राजतः सलिलादग्नेश्चोरतः स्व
जनादपि भयमर्थकृतां नित्यं मृत्योः पापकृतामिव सः।

शा
नं
९
6

कार्य्यमद्यकुर्वीतपूर्वाह्णेचापराह्णिके नहिप्रतीक्षतेमृ
त्युःकृतमस्यनवाकृतं कर्म्मणामनसावाचायः कर्म्मा
निरतःसदा अफलाकांक्षिविज्ञेयःसमोहमपियच्छति
अफलाकांक्षी स्वर्गाद्युपभोगजनकतारहित इत्यर्थः
अहोमोहस्यमहात्म्यंतन्मायाजनितस्यच किमस्यम
पिदेवर्षीन्मोहयेदमरानपि इतियामलवचनात् मार्क
ण्डेये महामायाहरेश्चैतत्तयासंमोह्यतेजगत् तयामहा
माययाजगत्संसारःमोह्यते नकेवलंजगत्संमोह्यते।
देवताअपि ज्ञानिनामपिचेतांसिदेवीभगवतीहिसा
बलादाकृष्यमोहायमहामायाप्रयच्छति ज्ञानिनामि
ति प्रपंचमायामिव निमज्जनिनामपिमहतीचासौ मा
याचेति महामायाब्रह्माविष्णुशिवादीनां मोहजनक
त्वात् महामाया तथाचोक्तं यामले सैव माया प्रकृति
र्यासंमोहयतिशंकरं हरिन्तथाविरिंचिंचतथैवान्यांज
गुर्भवान् कालिकापुराणे गर्भान्तर्ज्ञानसंपन्नंप्रेरितं
सूतिमारुतैः उत्पन्नंज्ञानरहितंकुरुतेयानिरंतरं पूर्वातिपूर्व
संस्कारसंयुक्तंमोहनेनियोज्यच आहारादौततोमोहममत्वज्ञा
नसंशयं क्रोधोपरोधलोभेषु क्षिप्त्वाक्षिप्त्वापुनःपुनः पश्चा
त्कामेननियोज्याशुचिंतायुक्तमहर्निशं सामहामायाहिविद्या
विद्याऽविद्याच यामहामायामुक्तेर्हेतुभूतासाविद्यायामहा
मायासंसारबंधनहेतुभूतासाऽविद्या मार्कण्डेये

सा विद्या परमा मुक्तेर्हेतुभूता सनातनी संसारबंधहेतु
श्चैव सैव सर्वेश्वरेश्वरी विद्या वा ऽप्यथवा ऽविद्या ह्यावेतौ सं
भवात्मभौ तत्कर्म यन्न बंधाय सा ऽविद्या परिकीर्तिता
यन्न बंधाय तत्कर्म सा विद्या परिकीर्तिता विद्याषु सर्व
दा सेव्या नापविद्या कथंचन अविद्या कर्मबंधः स्याद्दु
ष्टानं प्राणशपति ज्ञानानाशाद्भवेद्धानिर्हानौ संहरणं
पुनः संहाराद्भवेद्घोरो घोरान्नरकमेव च तस्मादवि
द्या क्वापि न सेव्यापि कदाचन या विद्या सा महामाया स
तु सेव्या सदा बुधैः यो विद्यामुपासते सो ऽंधं तमः प्रवि
शति इत्यत्रापि संसारैकनियतिरूपा ऽविद्या इति रुद्र
यामले सा विद्या मोक्षदा नित्या सर्वभूतेषु संस्थिता य
दा तुष्टा जगन्माता तदा सिद्धिमुपालभेत् वंदनीया सदा
सा पूजनीया च सर्वदा श्रोतव्या कीर्तितव्या च मा
या नित्या न गात्मजा वृथा न कालं गमयेद्द्युतक्रीडादि
ना सुधीः गमयेद्देवतापूजाजपजापस्तवादिना किम
न्यैव सदालापैर्व्यर्थदा सर्वथा यत्नमियात् तस्मान्मंत्रादिकं
सर्वं विज्ञाय श्रीगुरोर्मुखात् सेवेन मुच्यते देवि घोरसंसा
रबन्धनात् इति शाक्तानन्दतरंगिण्यां प्रथमोल्लासः ।
शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि विना दीक्षां
न मोक्षः स्यात् प्राणिनां शिवशासने न योगेन विना मंत्रेण न

शा.
नं.
२

मंत्रेणविनाहिसः हठयोगाभ्यासयोगेनब्रह्मसंसिद्धिकारकं
तमःपरिहृतेगेहेघटोदीपेनदृश्यते एवंमायाहृतोह्यात्मा
मंत्रेणागोचरीकृतः संप्राप्ते षोडशेवर्षे दीक्षांकुर्यात्स
माहितः वसेन्मंत्रैर्यथाविद्धमयःसौवर्णतांव्रजेत् दी
क्षाविद्धस्तथाह्यात्माशिवत्वंलभतेध्रुवं इतिकुलार्णवा
त् मंत्रमुक्तावल्यां जपोदेवार्चनविधिःकार्योदीक्षान्वि
तैर्नरैः नास्तिपापंध्यनस्तेषांमूलकंचयथाश्मनां रुद्र
यामले आगमोक्तविधानेनकलौदेवान्यजेत्सुधीः न
हिदेवाःप्रसीदंतिकलौवाम्यविधानतः आगमशास्त्रमु
त्पत्तिमाह रुद्रयामले आगतं शिववक्त्रेभ्योगतंचगिरि
जामुखे मतंश्रीवासुदेवस्यतस्मादागमउच्यते वक्त्रेभ्यः इ
तिवक्त्रवचनेपंचाम्नायलाभार्थं तथाचकुलार्णवे न
मःपंचमुखेभ्यश्चपंचाम्नायाःसमुद्गताः पूर्वश्चपश्चिमस्तद्वे
वदक्षिणोत्तरस्तोभवेत् ऊर्ध्वेनयसमधःस्यचेवहष्ठाम्नायइ
तीरितः यावंतःपांशवोभूमेस्तावंतःसमुदीरिताः एके
काम्नायजामंत्राभुक्तिमुक्तिफलप्रदाः सर्वेषामेवमंत्रा
णांदेवतानांफलप्रदा इतिवचनेभ्योवामदेवस्यमतंस
न्मतंइत्यर्थः तेनवेदविरुद्धत्वालाभान्नागमस्तुदासः स
दागमएवआगमशास्त्रस्यमुख्यत्वात् अतएवागमसंहिता
याम् असदागमस्यनिन्दामाह शिवः ॥

कलौ प्रायेणादेवेशि राजसात्त्वामसात्तथा निषिद्धाचर
णाः संतो मोहयंसपरान्वहून् श्रावाभ्यां पिशितं रक्तं
सुरां चैव सरेश्वरि वर्णाश्रमोचितं धर्म्मं मविचार्य्यार्प
यंति ये भूतप्रेतपिशाचास्ते भवंति ब्रह्मराक्षसाः इति व
चनात् श्रीक्रमेऽपि शिवेन परयाशक्त्याह्याभ्याः कृतं
समुद्धृतं वाच्यवाचकभावेन ह्याभ्यां ब्रह्मप्रकाशितं
दीक्षाशब्दार्थमाह यामले दिव्यज्ञानं यतो दद्यात्कुर्य्या
त्पापक्षयं यतः तेन दीक्षेति लोकेऽस्मिन्कीर्तिता तंत्र
पारगैः उपचारसहस्रैस्तु अर्चितां भक्तिसंयुतां अदी
क्षिताद्विनैर्देवा न गृह्णंति कदाचन कर्म्माखिलं वृथा
यस्मात्तस्माद्दीक्षितः पुनः क्रियासारे कलेहृष्टान्त।
यो मंत्रं जपेद्गुरुमनाश्रितः सूतानाशो भवेत्तस्य फल
मस्य स्तु उरतः यामले गुरोर्मुखोन्महाविद्यां गृह्णीया
त्पापनाशिनी तस्माद्यत्नाद्गुरुं कृत्वा मंत्रसाधनमाचरे
त् गुरुशब्दार्थमाह यामले गकारः सिद्धिदः प्रोक्तो रे।
फः पापस्य दाहकः उकारः शंभुरित्युक्तस्त्रितयात्मा गु
रुः स्मृतः सारसंग्रहे विशुद्धमातापितृको जितेन्द्रियः
सर्वागमज्ञः परतुः स्वकातरः यथार्थवाग्वेदविदंगणा
रगः शांतः कुलीनो गुरुरीरितो द्विजः द्विजउत्तमपादाना
ह्मणेभ्यः तेत्रे अमाचारो हि जोयस्तु वर्णानां गुरुरेव

पुरा. तं. ८

8

सः अत्रापि अधर्मनिरतो भूत्वा कृत्वा द्विजगरोर्स्मुखा
त् सर्वसिद्धिमवाप्नोति शीघ्रं देवत्वमाप्नुयात् शूद्रः शूद्र
पुत्रोप्युक्त्वा विद्यां वा मंत्रमुत्तमं गृहीत्वा नरकं याति दुः
खमाप्नोति निश्चितं न च तत्रेश्वरे सर्वेषामेव दीक्षाणां
मुक्तिः फलमवेदितं अविशेषाद्द्वमेषा प्रासंगिकात्फ
लश्रुतयः यामले दीक्षितो ब्राह्मणो याति ब्रह्मलोकम
नामयं ऐन्द्रलोकं क्षत्रियोपि प्राजापत्यमथो विशः याति
गांधर्वनगरं शूद्रो दीक्षाप्रभावतः अत्र शूद्रदीक्षाकारणश्रुतेः
न शूद्राय मतिं दद्यादिति वेदमंत्रपरं देवताविशेषपरं मंत्र
विशेषपरं वा वाराहीतंत्रे गोपालस्य मंत्रं दद्यान्महेशस्य
पिपादजे तस्मात्स्थापि हर्यस्य गणेशस्य मनुं लब्ध्वा प
वदीक्षाधिकारी स्यादन्यथा पापभाग्भवेत् इति वचनाद्दे
वतांतरस्य मंत्रे शूद्रानाधिकारः नृसिंहतापनीयश्रुतिः
सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छंति लक्ष्मीश्रीबी
जं लक्ष्मीमंत्रमित्यपि कश्चित् गोपालस्य दशाक्षरः प्रणमा
याद्याविशेषमंत्रस्य स्वाहागर्भोपि शूद्रायदेयः सर्वेषु वर्णे
षु तथाश्रमेषु इति क्रमदीपिकायां अभिधानात् नात्र सि
द्धसाध्यत्वसिद्धिविचिंतनं न चाधिकारचिंतात्र ग्रह
णे कालिकामनोरिति कालीकुलसर्वस्ववचना
त् तस्माद्गोपालस्य दशाक्ष ।। ।।

रशण्यामायाद्वाविंशमब्दान्मंत्रग्रहणेशूद्रस्याधिकारः
स्मृतस्तुद्धौ तंत्रोक्तमार्गेणवेदेविवर्ज्जितायाश्चस्मृतिरि
प्रजपेत्सततंशूद्रोनात्रकार्य्याविचारणा ब्राह्मणेण
वसंयुक्तंशूद्रेमंत्रंददातियः शूद्रोनिरयगामीस्याद्ब्रा
ह्मणोयात्यधोगतिं इतिवैदिकमंत्रपरम् स्त्रियोदी
क्षाशुभाप्रोक्तामातुश्चाष्टगुणास्मृता सधवाथवा
दीक्षातत्रनास्तिविचारणा स्त्रियइतिपदंनसर्वत्रा
स्त्रीपरम् विधवायानगुरुत्वं तदुक्तं तत्त्वसारे साध्वी
चैवसदाचारागुरुभक्ताजितेन्द्रिया सर्व्वतंत्रार्थसार
ज्ञासधवापूजनेरता गुरुयोग्याभवेदेषाविधवांप
रिवर्ज्जयेत् यातुः विधवायाःस्वतादेशात्कमायाः
पितृकृत्यया नाधिकारोविनानाथ्याभार्य्यायाभर्त्ते
राज्ञया इति विधवाया गुरुत्व बोधने तदमूलकं स
मूहत्वेपि सिद्धमंत्रोनरःसर्व्वमयोग्ययोग्यतांनयेत्
इति वचनेकवाक्यतया साधिमंत्रविषयं गुरुदीक्षा
तंत्रे मृतमप्यनुगच्छेतविद्यामंत्रोविशेषतः एवम
वमनुष्यस्यपूर्वकर्म्माणिफलति यदिनस्यान्महेशा
निसमनुष्यःकथंभवेत् दीक्षायांचकथंतस्यमनोभव
तिपार्व्वति तस्माद्यत्नतोदेविपूर्व्वविद्यासमुद्धरेत्
गुरुदीक्षातंत्रे वकुलाश्वत्थवटकेपत्ररत्नेशूलाग्रयिये

वटपत्रे महेशानि शक्तिमंत्रं लिखेत्प्रिये अश्वत्थे विल्वमं
त्रं च वकुले शिवमंत्रकं रक्तचन्दने देवेशि काश्मीरे वा
महेश्वरि शक्तिमंत्रं लिखेद्देवि चन्दने विष्णुमंत्रकं भ-
स्मना शिवमंत्रं च विलिखेत्परमेश्वरि सप्तसप्तपुटपत्रे
तत्तद्देवतायामंत्रं लिखेद्विमर्शधीः प्राणप्रतिष्ठां तन्मंत्रे
कारयेद्यत्नतः सुधीः तत्तद्देवतायाः प्राणप्रतिष्ठां कार
येत् यथाशास्त्रोपचारेण संपूज्य परमेश्वरि ततः शिष्य
स्यार्घ्यपात्रं हस्ते कृत्वा महेश्वरि अनेन मन्त्रनामंत्री भा
स्कराय निवेदयेत् अर्घ्यस्य मात्र आपः क्षीरं कुशाग्रा
णि घृतं दधि तथा मधु रक्तानि करवीराणि तथा र-
क्तं च चन्दनं अष्टांगमर्घ्यको ह्येषो वै भानवे परिकीर्तितः
ॐ भूदेव पृथिवीपाल सर्वशक्तिसमन्वितः ममार्घ्यं च
गृहाण त्वं सर्वविघ्नप्रकाशय अर्घ्यं दत्वा नमस्कृत्य कृ
तांजलिः पठेत्ततः गन्धर्वे नद्याद्भास्कराधार्घ्यं शंखा
तोयं महेश्वरि ॐ सूर्यः सोमो यमः कालो महाभूतानि
पंचवै पते शुभाशुभस्येह कर्मणो नव साक्षिणः स
र्वे देवाः शरीरस्था मम मंत्रस्य साक्षिणः पूर्वजन्मार्जि
तां विद्यां मम हस्ते प्रदापय पठेदिदं महेशानि सत्त्वं
पत्रमुद्धरेत् उद्धृत्य पत्रमेकं तु गुरोर्हस्ते प्रदापयेत्
गुरुस्तत्र अक्षराणि तु अधीत्य परमेश्वरि ॥

मेवंतदा महेशानि तन्मंत्राष्टशतं जपेत् शिष्यस्य मस्त
केहस्तं दत्वा चाष्टशतं जपेत् गुरुस्तत्प्रांजलिर्भूत्वा शि
ष्यः श्रमं स्तुवेः स्थितः त्रिवारं दक्षिणे कर्णे वामकर्णे
तथा सकृत् स्त्रीशूद्रविषये कुर्य्याद्विपरीतमनचिंतनम
स्त्राचमस्य संयतो भूत्वा प्राणायामं विधाय च अष्टोत्तरश
तेजस्राङ्गन्यासादिकसमन्वितं अष्टकृत्वा जपेन्मंत्रं वा
मकर्णे महेश्वरि इयं दीक्षा समर्थितं त्रेशाक्तिर्घापरिकी
र्तिता गुरोर्लब्ध्वा महाविद्यां अष्टोत्तरशतं जपेत् गुर
वे दक्षिणां दद्याद्वित्तशाठ्यं न कारयेत् गुरवे गुरुपुत्रा
यतत्पत्न्यै वा प्रदापयेत् कुलार्णवे गुरुप्रीतिसमाप
न्ने देवताप्रीतिमाप्नुयात् देवताप्रीतिमापन्ने मंत्रसि
द्धिर्भवेद्ध्रुवं पत्ररत्नप्रदानेन दीक्षां कुर्य्यात्कलौ युगे
ततः सिद्धो भवेन्मंत्री नात्र कार्य्या विचारणा धनदा
नं विना देवि दीक्षां कुर्य्याच्च यो नरः दीक्षा तु विफला
तस्य अंते च नरकं व्रजेत् ततः शिष्यो महेशानि प्रणमे
दण्डवद्भुवि गुरुर्वदेत् उत्तिष्ठ वत्स मुक्तोऽसि सम्यगा
चारवान्भव कीर्त्तिः श्रीः कान्तिमेधायुर्बलारोग्यं स
दास्तु ते योगिनीहृदये मंत्रं दत्वा गुरुश्चैव उपवासं स
माचरेत् महात्यघोरनरके कृतिर्भवति नान्यथा रु
द्रयामले दीक्षां कृत्वा यदा मंत्री उपवासं चरेद्यदि त

श्रा तं १ स्यादेवः सदा हृष्टः शापयन्ति मूर्द्धनि तंत्रसारे चन्द्रसूर्य्य
ग्रहे तीर्थे सिद्धक्षेत्रे शिवालये मंत्रमात्रप्रकथनमुपदे
शः स उच्यते रुद्रयामले श्रीमाया भैरवी तारा छिन्नम
स्ता च भैरवे मंजुघोषे तथा रौद्रे पंचांगं नेष्यते बुधैः त
त्रापि गुह्यकाली विषये पंचायतनी दीक्षापव यथा।
विश्वसारे गुरुरेव च लक्षोणै पूजयेत्क्रमतः सुधीः वि
ष्णुशिवं गणेशं च पूजयेच्च यथाक्रमात् दीक्षायां चक्र
विचारे दोषमाह गुप्तदीक्षा मंत्रे यः कुर्य्याच्चक्रगणनां
दीक्षायां पशुयामरः स भ्रष्टः स च पापिष्टः विष्ठायां जा
यते कृमिः किं ज्ञानैः किं यत्नैर्वा पि राशिलग्नादिकविचारणे
सिद्धसाध्यसुसिद्धारि विचारपरिवर्जितः नास्ति सत्सम
ह्रस्यानि नक्षत्रादि विचारणा राशयादि गणनं नास्ति शु
करेणेति भाषितं आगमकल्पद्रुमे रविसंक्रमणे चै
व सूर्य्यस्य ग्रहणे तथा नत्र लग्नादिकं किंचिन्न वि।
चार्यं कथंचन यामले शरत्काले युगाद्यायां ग्रहणे
चन्द्रसूर्य्ययोः बोधने चैव दुर्गायाः कालाकालं न शो
धयेत् मन्त्रमहके ग्रहणे च महातीर्थे नास्ति काल
स्य निर्णयः सोमग्रहे विष्णुमंत्रं सूर्य्ये शाक्तं न चा
चरेत् यामले सूर्य्यग्रहे शाक्तमंत्रं न प्रदद्या
ज्जिनो विभुः ॥ ॥ ॥

न गृह्णीयाद्पितथापदीक्षेदात्मनोहितं अत्रशक्तिपं
दं पंचमीपदं प्रकरणादिसद्यथाकारः अतएव
श्रीकामकालीबीजानि लोपादौगीरथोमनुः सूर्य
स्यापग्रहेलब्धो नृणांशीघ्रफलप्रदः इतियामलव
चनमपिसंगच्छते एतत्श्रीकामबीजानीतिकुलमू
लावतारेपाठः पूर्ववचनेशक्तिमंत्रपदं श्रीबीजा
द्यतिरिक्तमंत्रपरमितितत्शिवदीक्षाटीकाकृतः
यामले लग्नेवाप्यथवालग्ने यत्रतत्रतिथावपि गु
रोराज्ञानुरूपेणदीक्षाकार्याविशेषतः नतिथिर्नव्र
तंहोमोनस्नानंनजपक्रियाः दीक्षायांकारणंत्वत्र
स्वेच्छाप्राप्तेचसद्गुरौः सर्वेवाराग्रहाःसर्वेनक्षत्राणि
चराशयः यस्मिन्नहनिसंतुष्टोगुरुःसर्वेशुभावहाः
यदेवेच्छातदादीक्षागुरोराज्ञानुरूपतः ॥ अथदश
संस्कारमाह सारदायां जननंजीवनंपश्चात्ताडनंबो
धनंतथा अथाभिषेकोविमलीकरणाप्यायनेपुनः
तर्पणंदीपनंगुप्तिर्दशैतामंत्रसंस्क्रियाः मंत्राणांमातृ
कामध्यादुद्धारोजननंस्मृतं मातृकावर्णास्तु अका
रादिक्षकारांतामातृकाःप्रकीर्तिताः इतितंत्रराज
वचनात् मातृकायंत्रलिखनमाह भूमौगोमयलि
प्तायांविलिख्याष्टदलान्वितं चन्दनाद्यैःकठिन्यावाना।

शा
ते
११

र्णीयं कर्णिकागतं दिशाः स्वरान्केशरेषु वर्गानष्टदलेषु
च तस्माद्वर्गाद्ध्यंपकेन मूस्यादीयं त्रमुद्धरेत तार्णीयं सौः
कादिमांताः पंचवर्गा मातृकाः क्रमशोदिताः यादिका
ताः शादिहांता लक्षणे विलिखेत्ततः इति मातृकायंत्र
प्रणवांतरितान्कृत्वा मंत्रवर्णान्जपेत्सुधीः एतज्जी
वनमित्याहुः सर्वमंत्रविशारदाः दशधा वेशनधा वा
जपः यथाविस्तारे इष्टकशतं वा दशधा मंत्रवर्णा
न्जपेत्सुधीः मंत्रवर्णान्समालिख्य ताडयेच्चन्दनांभ
सा प्रत्येकं वायुना मंत्री ताडनं तदुदाहृतं ताडनं ताड
येद्वर्णान्विलोमश्चन्दनांभसा शतं वा दशधा वापि का
धयेत्तमंत्रमतः विलिख्य मंत्रं तन्मंत्री प्रसूनैः करवीरजैः
तन्मंत्राक्षरसंख्यातैर्हन्यायातेन बोधनं यातेनरमिति
बीजेन अश्वत्थपल्लवैर्मंत्रमभिषिंचेद्विशुद्धये मंत्र
स्यचाप्युक्तं वर्णमभिषिंचामिह्युतं अभिषिंचेदष्टा
यावा प्रत्येकमभिषेचनं शुभोदकेन ज्ञायेन अभिषेक
मुदाहृतं संचिंत्य मनसा मंत्रं ज्योतिर्मंत्रेण निर्दहेत मं
त्रे मलत्रयं मंत्री विमलीकरणं त्विदं तारव्योमाग्निमनुयु
क् दण्डी ज्योतिर्मंत्रमतः मनुस्वतद्दिशाह्वरो वर्णेर्ध्य
नुस्वारः तेन ह्रौं कुशोदकेन जप्तेन प्रत्यर्णं प्रोक्षणं म
नोः तेन मंत्रेण विधिवत्करणाप्यायनं मतं अमुकमंत्र

तर्पयामि नमः सर्वभस्माचतं सप्तनाशक्तिर्मंत्रेष्वेवैसमवेचे
न्नुमन्नलैः शैवेन्द्रतेनन्ह्ययेनतर्पिणोसमुदीरितं दशाथा
तर्पयेत्तावदिति ताररमायारमाय्योगेशुद्धितेनजपेन्मंत्रं
शतमष्टोत्तरेणैवदीपयेत्साधकोनमः तेजान्तरेसम
यादीपनमिति जप्यमानस्यमंत्रस्यगोपनंनप्रकाश
नं इतिमंत्राणांदशसंस्काराः विश्वसारे गृहीत्वाचम
हाविद्यांजपेद्रात्रौवाविधिप्रिये महागुरुनिपातादौन
पूजायांविकल्पना मोहाद्वायदिवादैवात्पूजयेन्नच
साधकः तस्यसर्वविनाशःस्यान्मारयेन्सदाशिवः अ
शुचौवाशुचौवापिसर्वकालेपिसर्वदा पूजयेत्परयाश
क्त्यानात्रकार्याविचारणा रुद्रयामले पूजयेन्मृतके
पिस्याज्जननेसूतकेपिवा सर्वत्रैवविधिःप्रोक्तःसर्व।
कामफलप्रदः अथसूतकिनःपूजांवक्ष्यामागमचो
दितां बाह्यपूजाक्रमेणैवध्यानयोगेनपूजयेत् देवीवि।
षये बाह्यपूजाकर्त्तव्याविशेषविधानात् तथाचोक्तं वा
राहीतंत्रे नारायाश्चैवकालास्वविप्ररायाश्चसूतके सू
तकेमृतकेचैवनसंजेयुर्जपार्चनं यामले अशुचिर्वा
शुचिर्वापिगच्छंस्तिष्ठन्स्वपन्नपि नदोषोमानसेजाप्ये
सर्वदेशेषुसर्वदा विश्वसारे जाग्रत्स्वपन्नतिष्ठन्वा।
ज्ञानेगमनेपिवा सिद्धमंत्रेनदोषःस्याद्देशाचनियमोपिच

गा नकस्मिन्नादिवारात्रौ न च सन्ध्यावसानके । अग्रेण्यगुरुमाहा
तं त्म्यं गुरुः सर्वेश्वराधीशो गुरुः साक्षीकृताकृती । संपूज्य
१२ सकलं कर्म कुर्य्यात्तस्याज्ञया सदा । गमनं पूजनं जापं भो
जनं रमणं तथा । गृहीत्वाज्ञां गुरोः कुर्य्यात्तस्य सिद्धिर्विना
नुपात् । त्रिसन्ध्यं श्रीगुरोर्ध्यानं त्रिसन्ध्यं पूजनं गुरोः । त्रिस
न्ध्यं भावयेन्नित्यं गुरुं परमकारणं । स्वगुरुं हि विना देवि
नान्यं च गुरुमर्च्चयेत् । प्रत्यक्षो वा परोक्षो वा प्रत्यहं प्रणमे
द्गुरुं । एकग्रामे स्थितं नित्यं त्रिसन्ध्यं प्रणमेद्गुरुं । क्रोशमा
त्रस्थितो भक्त्या गुरुं प्रतिदिनं नमेत् । अर्द्धयोजनतः शि
ष्यः प्रणमेत्पञ्चपर्वसु । एकयोजनमारभ्य योजनद्वा
दशावधि । तत्तत्संख्यागतैर्मासैः प्रणमेत् श्रीगुरुं प्रिये
यदि दूरे वसेद्देवि श्रीगुरुर्नगनन्दिनि । संवत्सरस्य मा
ध्ये तु पूजयेद्विधिनाशुना । एकधोत्तरायणे काले एक
धा दक्षिणायने । एवं यो नाचरेद्देवि स भवेद्ब्रह्मराक्षसः
एकत्र गुरुणा सार्द्धं स्वपित्युपविशेद्वयः । स याति नर
कं घोरं यावदिन्द्राश्चतुर्दश । तत्रैव गुरुमालोकितः शि
ष्य उत्तिष्ठन्नासनं त्यजेत् । जातिविद्याधनाढ्योपि दूरे दृ
ष्ट्वा गुरुं मुदा । प्रणमेद्दण्डवद्भूमौ प्रदक्षिणमथाचरेत्
आयान्तमग्रतो गच्छेद्गच्छन्तमनुव्रजेत्
प्रणम्य प्रविशेत्सार्द्धं न तदा गच्छेदनुज्ञया ।

मुखावलोकी सेवेत कुर्य्यादाज्ञादिमादरात् असत्यं न व
देदग्रे न वक्रमालपेदपि ऋणदानं तथादानं वस्तूनां क्रय
विक्रयं न कुर्य्याद्गुरुणा सार्द्धं शिष्यो देवि कथंचन गुरु
र्माता पिता स्वामी बान्धवाश्च सुहृद्गुरुः इत्याधाय मनो
नित्यं भजेत् सर्वात्मना गुरुं गुरोरग्रे पृथक्पूजामौद्धत्यं च वि
वर्जयेत् दीक्षां व्याख्यां प्रभुत्वं च गुरोरग्रे परित्यजेत् आ
सनं शयनं वस्त्रं भूषणं पादुकां तथा छायां कलत्रमन्त्र
यदृष्टं तन्न पूजयेत् यथा देवं तथा मन्त्रं यथा मन्त्रं तथा गुरौ
यथा गुरौ तथा स्वात्मन्येवं भक्तिक्रमः स्मृतः गुरुशय्यास
नं यानं पादुकोपानत्पीठं तथा स्नानोदकं तथा छायां ल
ङ्घयेन्न कदाचन अन्यत्रापि देवच्छायां गुरुच्छायां शक्ति
च्छायां न लङ्घयेत् यदि प्रमादतो देवि गुरोरग्रे प्रसृजयेत् स
याति नरकं घोरं सा पूजा निष्फला भवेत् रिक्तहस्तेन नोप
यायाद्राजानं देवतां गुरुं फलं च पुष्पकादीनि यथाशक्त्या
समर्पयेत् भक्त्या पाण्याद्यनुसारेण गुरुमुद्दिश्य यत्कृतम्
सत्यमेव महत्तुल्यं तत्तुल्यमाप्य दरिद्रयोः गुर्वर्थं कृपणो
देवि रौरवं नरकं व्रजेत् गुरुवाक्यान्तं तत्कृत्वा आत्मवा
ञ्छितं स्थापयेत् गुरुं जेतुं मनो यस्य पच्यते नरकाणि वै
गुरोर्नाम न भाषेत जपकालादृते क्वचित् ब्राह्मणाः क्ष
त्रिया वैश्याः शूद्राश्च न गतं न्दिनि भुंजते विद्यया मत्का गुरो

श्या. तं. १३

13

रुच्छिष्टमुत्तमं आगच्छेयदि चार्वंगि गुरुः शिष्यस्य मंदि
रे शिष्यस्य मन्दिरं देवि कोटिसूर्यग्रहैः समं चन्द्रग्रहण
कालं हि तत् दिनं वरवर्णिनि गुरोर्दर्शनमात्रेण सर्वपा
पैः प्रमुच्यते गुरुं वा गुरुपुत्रं वा पत्नीं वा वरवर्णिनि वि
लंघ्य यदि चार्वंगि गच्छेत् साधकसत्तमः तत्क्षणाद्भवे
त् याति नरकं चोत्तरोत्तरं उत्तरकल्पे साक्षात् पापिपरो
हो वा गुरोराज्ञां समाचरेत् परोक्षे तद्गुरुस्थाने विधानेषु
ण शंकरि पूजाकाले च चार्वंगि आगच्छेच्छिष्यमन्दिरं
गुरुर्वा गुरुपुत्रो वा पत्नी वा वरवर्णिनि तदा पूजां परि
त्यज्य पूजयेत्स्वगुरुं प्रिये पश्चात्स्वं हि गुरोर्देवं प्रकटं तेन स
करोत्यपि तिर्यग्योनिमागच्छेत्तस्मादेवं हि ते सदा
सहस्रारे गुरोः पादपद्मं ध्यात्वा प्रपूजयेत् च स्तुत्वा करपुटं कृ
त्वा मनसा ध्यानतत्परः मंत्रः विदितं विदयेनाद्यविधे
यं यत्कृपाकर अविरुद्धं भवेत्तत्र तत्त्वदीयप्रसादतः इ
ति मंत्रेण संप्रार्थ्य ततः कर्म समाचरेत् महिषमर्दिनी
तंत्रे श्रीदेव्युवाच देवदेव महादेव कृपया परमेश्वर गु
रुपूजाविधानं मे विस्तराद्वद शंकर ईश्वर उवाच दिव्य
वीरं च चार्वंगि पूर्वोक्तं च रूपशः प्रिये मानवस्य क्रमं देवि
संक्षेपात्तन्निगदामि ते गुरुः परगुरुश्चैव परापरगुरुस्तथा
स्वगुरुः परमेशानि साक्षाद्ब्रह्म न संशयः तमितापरमा

गुरुः स्वयं विभुः द्वितीयो सदा नमिता परापरगुरुर्महेश्वर
समः सदा गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः अतए
व महेशानि साक्षात्कुलनयो गुरुः अखण्डमण्डलाका
रं सर्वव्यापि महेश्वरं सर्वेशं सर्वदं देवं प्रणमामि पुनः पु
नः पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यां नमो नमः त्रिसंध्यं
श्रीगुरोर्ध्यानं त्रिसन्ध्यं पूजनं गुरोः त्रिसन्ध्यं भावयेन्नि
त्यं गुरुं परमकारणं गुरुं विना वरारोहे नास्ति सिद्धिः क
दाचन गुरुं स्मृत्वा महेशानि दिवसे दिवसे प्रिये पूजये
त्स्नानैर्गन्धैर्धूपैर्दीपैः स्तथोत्तमैः भक्ष्यैर्भोज्यैस्तथा
पेयैरीप्सितैरनेकदा पनसैर्नारिकेलैश्च तथाम्रं भाफ
लैः प्रिये अन्यैर्नानाविधैर्देवि पूजयेत्स्वगुरुं प्रिये स्वगु
रुं हि विना देवि नामेव गुरुमर्चयेत् मत्स्यमांसैर्महे
शानि पूजयेद्भक्तितः प्रिये गन्धमाल्यैश्च वासोभिः पूज
येद्भक्तितः सदा स्वर्णैश्च पट्टवस्त्रैश्च तथा कार्पाससंभवैः
अविच्छिन्नैर्विचित्रैश्च अतिसूक्ष्मैर्मनोहरैः अलंकारैश्च
थादेवि विविधैः स्वर्णनिर्मितैः रत्नैश्च वचार्चेत्स्व
गुरुं पूजयेत्सदा आसनैर्विविधैर्देवि रक्तकम्बलसंयुतैः
तथा नानाविधैर्द्रव्यैः पूजयेत्स्वगुरुं सदा गुरोर्मन्त्रं महे
शानि प्रजपेन्नरवन्दिते गुरोः पत्नीं महेशानि पूजयेद्धि
धिना मुदा गुरुवत्कुरुपुत्रेषु गुरुवत्तन्यत्नतेषु च पूजयेत्स

गु॰
तं॰
१४

ह्येमन्त्रश्चामुनाविधिनाप्रिये गुरोरभावेचार्चयेद्गुरुपु
त्रंस्वयंशिवं तदभावेवरारोहेगुरुकन्यांचपूजयेत् त
दभावेचचार्चयेद्गुरुस्नुषांप्रपूजयेत् एषामभावेचार्च
येद्गुरोर्गोत्रंप्रपूजयेत् गोत्राभावेवरारोहेतच्छामातामं
हस्यच मातुलंमातुलानींवापूजयेद्विधिनामुना यदि
हेचचार्चयेद्गीस्वगुरुंनगानन्दिनि संवत्सरस्यमध्येतुपू
जयेद्विधिनामुना पक्षयोरुत्तरायणेकालेपक्षयोर्दक्षि
णायने पूजयेद्गुरुदेवंचविधिनाचामुनाप्रिये यदिनै
पूजयेद्देविश्रद्धेनविधिनाप्रिये प्रायश्चित्तीभवेद्देवित
त्क्षणात्सचसाधकः मन्दिरंगुरुदेवस्यसदाकाशीपु
रीसमं काशीसमंमहेशानिय:पश्येद्गुरुमन्दिरम्
शिवतुल्योभवेद्देवितत्क्षणात्सचसाधकः गुरोर्गेहंस
मासाद्यउच्छिष्टभक्षणंचरेत् तदैवसहसासिद्धिः सा
धकस्यभवेत्प्रिये श्रीमोऽक्षायुगुरुदेवस्यउच्छिष्टंवरव
र्णिनि विद्यांवापरमेशानिमंत्रंवानगानन्दिनि नज
पेत्तकदाचित्तुत्रयंचित्तकचिदेवहि तन्मुखेचंचला
पांगिविष्ठाकूपसमंप्रिये उच्छिष्टभक्षणाद्देवि सुरेस
शोधनंप्रिये ब्राह्मणाःक्षत्रियावैश्याशूद्राश्चनगानन्दि
नि भुंजतेविविधैर्भक्ष्यागुरोरुच्छिष्टमुत्तमम् गुरोरुच्छि
ष्टमत्रंचसदानन्दमयंप्रिये गुरुंवागुरुपुत्रंवापत्नी

14

वावरवर्षाणि विलंघ्य यदि वांबगि नरकं चोत्तरोत्तरं
मन्दिरं गुरुदेवस्य कुटिरं यदि पार्वति कैलाशसदृशा
कारं तद्देवनगनन्दिनि यद्यदिष्टतमं लोके साधक
स्य शुचिस्मिते तत्सर्वं गुरवे दद्यात् अन्यथा परमेश्वरि ततः
तद्देवसद्मसादेवि मन्त्रसिद्धिः प्रजायते गुरोराज्ञासमा
दाय पूजयेदनिशं यदि तद्देवसद्मसा सिद्धिरष्टसिद्धी
श्वरो भवेत् पूजाकाले कांबगि आगच्छेच्छिष्यमन्दि
रं गुरुर्वा गुरुपुत्रो वा पत्नी वा वरवर्षाणि तदा पूजां प
रित्यज्य स्वगुरुं पूजयेत्प्रिये देवतापूजनार्थं च यद्द्रव्य
ष्पादिकं प्रिये तत्सर्वं गुरवे दत्वा पूजयेन्नगनन्दिनि
तद्देवसद्मसादेवि वरदा प्रीतिमाप्नुयात् रुद्रयामले
गुरुर्वा गुरुपत्नी वा पुत्रो वापि समागतः ज्येष्ठो वाप्य
ज्ञेनामध्ये शिष्यः सर्वाद्वैनां त्यजेत् आज्ञया पूजयेद्वि
द्य इति शास्त्रस्य निर्णयः गन्धैः पुष्पैस्तथा धूपैस्तथा
नैवेद्यकैरपि पूजयेद्विविधैर्भक्त्या स्वगुरुं तत्सुतं च
वा गुरुर्देवो हरः साक्षात्तत्पत्नी हरवल्लभा गुरुपुत्रो
गणेशः स्याद्विभागपूजनं नचरेत् गुरुपत्नी महेशानि
साक्षाद्देवीस्वरूपिणी गणेशसदृशो देवि गुरुपुत्रं विभा
वयेत् शिष्यस्य तद्दिनं देवि कोटिसूर्यग्रहैः समं चन्द्र
ग्रहणकालं हि तद्दिनं वरवर्षाणि गुरोर्दर्शनमात्रेण सर्व

शा
तं
१५
15

पापैः प्रमुच्यते तत्क्षणान्तं च वलापं गिष्टानं दद्याद्विचक्षणः
स्वर्णगोतिलवस्त्रं च रजतं च विशेषतः गुरोः प्रीतिं समु
द्दिश्य दानं कुर्याद्विचक्षणः गुरोः प्रीतिं समुत्पन्ने देव
ताप्रीतिमाप्नुयात् देवताप्रीतिमापन्ने मंत्रसिद्धिर्भवे
द्ध्रुवं गुरोः समीपे चार्द्धयोगिन मिथ्यावाचो वदेत्कचित् गु
रोरंगे महेशानि देवताकारमुत्तमं गुरोः क्रियामहेशा
निपूजामूलं महेश्वरं गुरोर्वाक्यं मूलमंत्रं परं ब्रह्म स्वयं
गुरुः अनेन विधिना देवि प्रसदं भावयेद्गुरुं तदैव मह
सासिद्धिर्जायते कमलानने इति श्रीब्रह्मानन्दगिरि
परिव्राजकाचार्य्यपरमहंसतीर्थावधूतविरचिता
यां शाक्तानन्दतरंगिण्यां दीक्षानिर्णयो नाम द्वितीयो
ल्लासः २ विना चोपासनं देवि न ददाति फलं नृणां तंत्रे
ध्यानःस्मृतः पूजितो वा स्तुतो वा नमितोऽपि वा ज्ञान
तोऽज्ञानतो वापि शूद्रकानां विमुक्तिदः ईश्वरादिषु पू
जादिकं चतुर्वर्गफलं न संभवति निर्गुणब्रह्मणः के
न प्रकारेण पूजादिकं कार्य्यं शरीररहितत्वात् केन प्रका
रेण प्रसादादिकं दातुं शक्यते अत एव साधकानां हिता
र्थाय सगुणनिर्गुणभेदान् ब्रह्मणो द्वैविध्यमाह श्री
रामतापनीयश्रुतौ कुलार्णवे च चिन्मयस्याद्वितीयस्य
उपासकानां कार्य्यार्थं ब्रह्मणो रूपकल्पना अस्यार्थः

विस्मयस्य ज्ञानस्य मार्कण्डेयपुराणे चितिरूपेण या
कृत्स्नमेतद्व्याप्य स्थिता जगत् अद्वितीयस्यैकस्य
तथा चोक्तं योगिनीहृदये एको हि परमं ब्रह्म नाना
त्वेन निरूप्यते स्थूलसूक्ष्मविभेदेन परं ब्रह्मस्वरूपिणी
गोपालतापिनीयश्रुतिरपि एक एव परं ब्रह्म मायया च
चतुष्टयं तस्माद्ब्रह्मैव वर्णरूपेण स्त्रीरूपेण माययैव न-
टवद्बहुरूपा भवति बहुरूपवद्भाति मायया बहुरूपया
इति श्रुतेः निष्कलस्य कलामायया तया रहितस्य आग्ने
यपुराणे सकलो निष्कलो ज्ञेयः सर्वज्ञः परमो हरिः दे
हस्थः सकलो ज्ञेयो निष्कलो देहवर्जितः हरिरिम्यपल
द्वाणाम् यामले सगुणो निर्गुणश्चेति महामाया द्विधा
मता सगुणा मायया युक्ता तया हीना तु निर्गुणा अ
शरीरिणः शुद्धहस्तपादाद्यवयवावच्छिन्नशरीररा-
हितस्य भूतशुद्धौ निष्कलं परमं ब्रह्म कृतः प्रीतिः कुतः
सुखं निराहारं निरीहं च रहितं हि त्रिन्द्रियेण च जन्मक
र्माणि सर्वाणि ब्रह्मणो नास्ति भाविनि प्रकृतेः सन्ति
भाविनीति पाठश्च उपासकानां ज्ञानयोगभक्तियोगव
तामित्यर्थः लैङ्गे सर्वेषामेव मर्त्यानां विभोर्दिव्यवपुः श्रु
मं सकलं भावनायोग्यं योगिनामपि निष्कलं योगिनां क
र्मयोगज्ञानयोगभक्तियोगवतामित्यर्थः आग्नेयपुराणे

शा. तं. १९

साधूनामप्रमत्तानां भक्तानां भक्तवत्सलः उपकर्त्तानि
राकारस्तदाकारेण जायते कार्य्यार्थं साधकानां चव
तुर्वर्गफलार्थदः तथा चोक्तं मार्कण्डेयपुराणे आ
राधिता सैव नृणां भोगस्वर्गापवर्गदा बृहन्नारदीये
भक्तानां मोहदानाय भवतो मूर्त्तिकल्पना आराधनां
ध्यानपूजाभेदज्ञानात्मिकां ध्यानभेदज्ञानार्थं बा
लाणोरूपकल्पनाद्यर्थः ध्यानं तु तत्तद्देवतायास्तत्त
न्मंत्रघटकीभूतेन तत्तद्गुणैः सन्नभुजवक्त्रहस्तपादाद्यवय
वावच्छिन्नशरीरज्ञानविषयार्थमिति तन्निष्कर्षार्थः
तथा चोक्तं गुरुदेऽपि अमूर्तौ चित्तस्थिरो न स्यात्ततो
मूर्त्तिं विचिंतयेत् यामलेपि स्थूलसूक्ष्मविभेदेन
ध्यानं तु द्विविधं भवेत् सूक्ष्मं मंत्रमयं देहं स्थूलं विग्र
हचिंतनं करपादोदरस्यापि रूपं यत् स्थूलविग्रहं सू
क्ष्मं च प्रकृतेरूपं परं ज्ञानमयं स्मृतं सूक्ष्मध्यानं महे
शानि कदाचिन्नहि जायते स्थूलध्यानं महेशानि कु
र्यान्मोक्षमवाप्नुयात् यामले देवतायाः शरीरं तु बीजा
दुत्पद्यते ध्रुवम् ततो बीजात्मकं मंत्रं जपाद्ब्रह्ममयो
भवेत् तदिष्टं भावयेद्देवि यथोक्तध्यानयोगतः वर्णे
रूपेण सा देवी जगदाधाररूपिणी बीजात्तु वर्णेन बी
जपरिभाषामाह कुलचूडामणौ एकाक्षरीमनुद्दि

18

मपूर्वबीजं परं शक्तिरिति पूर्वकमिति परमीकारः ना
न्यथैव निगमेकान्तं ब्रह्मअदन्तरं परमं पदं सकृज्ज्ञात्वा
दन्तरं मे ब्रह्मभूयाय कल्पते तस्मात्तत्साधयेत्सर्वं बहु
ज्ञायेन किं फलम् स्थूलः सूक्ष्मः एक एव तथा चोक्तं
यामले उत्तमप्यद्विविधं देविकादिभिःसच्छन्नता तथा का
दिमिस्सच्छन्नतायां तदुत्तमेव नमस्यायः पाश्चेऽपि दीप
गुप्यते दीपो यथा नतद्विपश्यति इतिवचनात् अथ
बाह्यपूजकयोर्भेदार्थं ब्रह्मणो रूपकल्पना तथा
चोक्तं कौर्मे मन्यन्ते ये सदात्मानं विभिन्नं परमेश्वरात्
न ते पश्यन्ति तं देवं वृथा तेषां परिश्रमः ईश्वरस्य फल-
त्वाणाम् तथा चोक्तं रुद्रयामले सर्वदेवमयी देवी सर्व
देवमयीपराम् आत्मानं चिन्तयेद्देवी परमानन्दरू
पिणीम्। अथ प्रसंगात् योगज्ञानं लिख्यते अथाप
रेश्वरस्यापि समाधिं भवनाशनं भवनाशनं जन्मनाश
नमित्यर्थः हृत्पद्मकर्णिकामध्ये ध्यायेत्सिंहं मनोहरं
सिंहोपरि स्थितं पद्मं रक्तं तस्योर्ध्वगः शिवः तस्योपरि
महादेवी रमते कामरूपिणी सितप्रेतो महादेवो ब्रह्मा
लोहितपंकजः रक्तप्रेतोऽपि पंकज इति वा पाठः हरि
हरस्तु विज्ञेयो वाहनानि महौजसः ध्यायेत्तु परमेशानीं
नियथोक्तं ध्यानयोगतः देह्यात्मकं समात्मानं भावये

श्या.
नं.
८

यतमानसः तस्मात्स्वरूपं परतत्त्वकीयमितिभावये
त् एकांतभावयेन्निमित्तहृद्देवतात्मना श्रीक्रमेऽपि
आत्मानं चिंतयेद्देवीशक्तिमायास्वरूपिणि मनसा
वचसा चैव कापि केनचचिंतयेत् अन्यत्रापि आत्मा
भेदेन संचिंतयाति तन्मयतां नरः सोऽहमित्यस्य सत
तं चिंतनात्तन्मयो भवेत् अहं देवि नचान्योऽस्मि ब्रह्मैको
ऽहमिति भावयेत् रुद्रस्य चिंतनाद्रुद्रो विष्णुः स्याद्विष्णु
चिंतनात् दुर्गायाश्चिंतनाद्दुर्गा भवत्येव नचान्यथा
एवमभ्यस्यमानस्तु अहमहनि पार्वति जरामरणदुः
खौघैर्मुच्यते भवबन्धनात् ध्यानयोगपरस्यास्य पुंसो
नास्तिकथंचन विना मायैर्विना पूजां विना न्यासैः पुर
स्क्रियां ध्यानयोगाद्भवेत्सिद्धो नामथ्याविलपार्वति
एतत्ते कथितं देवि ब्रह्मज्ञानमिदं महत् विज्ञाय गुरुतो
देवि संसारसागरं तरेत् अहं ब्रह्मास्मि विज्ञानादात्मा
नविलयो भवेत् सोऽहमित्येवं संचिंत्य विहरेत्सर्वदापि
ये यथा फेनतरंगादि समुद्रादुत्थितं पुनः समुद्रे लीय
ते तद्वज्जगदात्मनि लीयते इति गन्धर्वतंत्रोक्तयोगः
तस्मात् साधकानां हितार्थाय ब्रह्मस्त्रीपुंरूपं यत्ते
विष्णुयामले देवी प्रति विष्णुवचनम् मातस्त्व
ते परमं रूपं तन्न जानाति कश्चन ॥

कात्यायाः स्थूलयद्रूपं तदङ्गेतिदिवौकसः यामले ।
स्त्रीरूपं वा स्मरेद्देवीं पुंरूपं वा स्मरेत्प्रिये स्मरेद्वा निष्कलं
ब्रह्म सच्चिदानन्दरूपिणाम् स्तनयोमायवयवावच्छि
न्नशरीराः स्त्रीरूपावताराः तद्यथा कालीनीलामहा
दुर्गात्वरिताछिन्नमस्तका वाग्वादिनी चान्नपूर्णा तथा
प्रत्यंगिरा पुनः कामाख्या वासिनी बाला मातंगी शैलवा
सिनी इत्याद्याः सकला विद्याः कलौ पूर्णफलप्रदाः अन्य
त्रापि प्रकृतिके विराट्रूपं या शक्तिर्लक्ष्मीति चापरे भारती
त्यपरे [illegible]गिरिजां त्वंबिकेति च दुर्गेति भद्रकालीति
चण्डी माहेश्वरी तथा कौमारी वैष्णवी चैव वाराहैन्द्री
ति चापरे ब्राह्मीति विद्याविद्येति मायेति च तथापरे प्र
कृतिश्च परा चैव वदन्ति परमर्षयः शिवाद्यवयवावा
च्छिन्नशरीरावच्छिन्नावताराः पुंरूपाः यथा ब्रह्मवि
ष्णुशिवादयः एवं मत्स्यः कूर्मो वराहश्च नृसिंहो वाम
नस्तथा रामो रामश्च रामश्च बुद्धः कल्की च ते दश इत्या
दि नपुंसकं गृहस्थैरनुपास्यमेव फलाजनकत्वात् गृह
स्थानां च सर्वेषां ब्रह्मैव ब्रह्मचारिणाम् गृहस्थानां च स
गुणस्योपादानात् शिवदुर्गाविष्णुपुरस्कारेण उपासना
कार्या तथा च विमलानन्दभाष्ये कूर्मपुराणम् मनु
ष्याणाम् उमादेवी तथा विष्णुः सदाशिवः ध्यायस्याभिमता

शा
ने
१८

18

पुंसः सहितस्यैव देवता किन्तु कार्यविशेषेण पूजिता
स्वेष्टदानरूपा नृणां मनुष्याणामभेदेन पूजा कार्या शि
वदेवी प्रति ईश्वरवाक्यं एकं प्रशंसन्ते यस्तस्य सर्वानेव प्र
शंसति एकं निन्दति यस्तेषां सर्वानेव विनिन्दति ईश्वर
स्य प्रशंसायां न सुखं विनिन्दायां वा न दुःखं सुखदुःखर
हितत्वात् किन्तु निन्दकस्य नरकमेव तथा चोक्तं भाष्ये
देवीविष्णुशिवादीनामेकत्वं परिचिन्तयेत् भेदकृन्नरकं
याति यावदाहूतसंप्लवं आहूतसंप्लवं प्रलयकालप
र्यन्तमित्यर्थः वाराहे यथा दुर्गा तथा विष्णुर्यथा विष्णु
स्तथा शिवः एतत्त्रयमेकमेव न पृथग्भावयेत्सुधीः
योऽन्यथा भावयेद्देवान् मत्पापेन मूढधीः स याति नरकं
घोरं रौरवं पापपूरुषः यामले ध्यानगम्यं प्रपश्यन्ति रु
चिभेदात्पृथग्विधं ते ते एके वह्निमहामायानामभेदं स
माश्रिता विमोहनाय लोकानां तस्मात्सममना भवेत्
प्रवृत्तिमार्गसंस्थस्तु देवतां भेदेन पूजयेत् निवृत्तिमार्गमा
गतस्तु भेदवाद्यं विवर्जयेत् शिवविष्णोरुपासनं सकादे
व्युपासनाकर्तृणां कोमलान्तःकरणत्वात् भुक्तिमुक्ति
दातृत्वाच्च शिवविष्णोरुपासनाया कायक्लेशेन मुक्तिमात्रं
तथा च सारदायां भुवनेश्वरीं प्रति शिववाक्यं आयासक्ले
शजनितेन वयोऽवनाशिशीलाधिराजतनया पुष्पति कोमलाशि

समयान्ते कदाचिन्न कस्य मुक्तिः स्यात्कस्यचिद्भुक्तिरेव च
यतस्याः साधकस्यास्य भुक्तिर्मुक्तिः करे स्थिता । रुद्रयामले
यत्रास्ति भोगो न च तत्र मोक्षो यत्रास्ति मोक्षो न च तत्र भोगः
शिवापदाम्भोजयुगार्च्चकानां भोगश्च मोक्षश्च करस्थ एव
यो ऽस्मिन्प्रादर्शने ऽप्यस्य भुक्तिमुक्तिं च कांक्षति । समलय
यनेनैव यत्नवान्सम्भवेद्यदि भुक्तेरनन्तविश्रान्तिर्यथा
जायते पार्वति तथास्मद्दर्शने ऽप्यस्य भुक्तिमुक्तिं च कांक्षा
ति इति शाक्तानन्दतरङ्गिण्याम् अभेदज्ञाननिर्णयस्तृतीयो
ल्लासः ३ । यामले प्रातः कृत्यमकुर्वाणो यो देवीभक्ति
नरः ह्वयेत तस्य पूजा च विफला शौचहीना यथा क्रिया
ब्राह्मे मुहूर्त उत्थाय चिन्तयेद्गुरुदेवतम् स्वमूर्द्धनि सह
स्रारे शिवाख्ये परविन्दुके ब्राह्ममुहूर्तमाह यामले द्वौ
दण्डौ रात्रिशेषे तु ब्राह्मो मुहूर्तकं विदुः । ध्यानं यथा श
शांकायुतसंकाशं वराभयलसत्करम् शुक्लाम्बरधरं
श्रीमच्छुक्लमाल्यानुलेपनं वामोरुरक्तपद्माश्च युतं
देवाख्यमव्ययम् शिवेनैकं समन्वीक्ष्य ध्यायेत्स्वगुरुं धि
या एवं ध्यात्वा गुरुं तत्र वेव पञ्चभूतमयैर्यजेत् गन्धतत्त्वं
पार्थिवं तत्र कनिष्ठाङ्गुलियोगतः शब्दरूपमयं मस्थाङ्गं प्र
थमाङ्गुलियोगतः वायुरूपं महाशून्यं तर्जनीभ्यां नियो
जयेत् तेजोरूपं महादीप्तं मध्यमाद्वययोगतः अमृतं

शा
तं
१९

19

मोजनं तत्हृदम्भतांगुलियोगतः नमस्कारेणांजलिनावा
ग्भवान्तां चुलंस्थतम् स्वस्वबीजेन संबन्ध नमस्कारेणयो
जयेत् गुरोर्मन्त्रप्रयत्नेन प्रजपेत्स्वरवर्जिते वाणीच
भुवनेशानीरमाचैवमहेश्वरी तारत्रयमिदं प्रोक्तंयस्य
मंत्रप्रतिष्ठितम् ततः स्वगुरुं नमोऽन्तेनानन्दनाथमा
लिखेत् स्वशक्तिपदान्तेच अम्बापदमथालिखेत् श्री
पादुकांसम्पूज्यार्घ्यं पूजयामीतिमं जपेत् तेजोरूपंसम
र्घ्यार्थ्यस्तवेनततोध्यायेद्गुरुं म शरणमारहस्ये मनसागन्धः
पुष्पैर्धूपैः संपूज्य वाग्भवं जपेत् कुब्जिकान्तेत्रोक्तं स्तुतिं
कुर्यात् ॐ नमस्तुभ्यं महामन्त्रदायिने शिवरूपिणे ब्र
ह्मज्ञानप्रकाशाय संसारदुःखतारिणे अतिसौम्याय
दिव्याय वीराय अज्ञानहारिणे नमस्ते कुलनाथाय कुल
कौलिन्यदायिने शिवतत्त्वप्रकाशाय ब्रह्मतत्त्वप्रका
शिने नमस्ते गुरवे तुभ्यं साधकाभयदायिने अनाचा
राचारभावबोधाय भावहेतवे भावाभावविनिर्मुक्तम्
तेयगुरवे नमः भावाभावविनिर्मुक्तशक्त्यै इति वा पठे
नमस्ते शंभवे तुभ्यं दिव्यभावप्रकाशिने ज्ञानानन्दस्वरू
पाय विभवाय नमो नमः शिवाय शक्तिनाथाय विद्याना
थाय सच्चिदे कामरूपाय कामाय कामकेलिकलात्मने
कुलधर्मोपदेशाय कुलार्णवस्वरूपिणे आरक्तनिजत

व्यक्तिसमभावविभूतये वामभागविभूषिते इति
वापरः नमस्ते ऽस्तु महेशाय नमस्ते ऽस्तु नमो नमः
इदं स्तोत्रं पठेन्नित्यं समाधको गुरुदिङ्मुखः प्रातरुत्था-
य यदेवेशि ततो विद्या प्रसीदति कुलसंभवपूजा-
यामादौ यो न पठेदिदम् विफला तस्य पूजा स्यादभि-
चाराय कल्पते इति कुब्जिकातन्त्रोक्तश्रीगुरुस्तोत्रं
समाप्तम् । इति स्तुत्वा प्रणमेत् अखण्डमण्डला-
कारं व्याप्तं येन चराचरम् तत्पदं दर्शितं येन तस्मै
श्रीगुरवे नमः ॐ अथ प्रसंगात् षट्चक्रमवस्थालि-
ख्यते तिस्रः कोटयस्तदर्धेन शरीरे नाड्यो मताः ता-
सु मुख्या दश प्रोक्तास्तासु तिस्रो व्यवस्थिताः प्रधाना
मेरुदण्डे ऽत्र चन्द्रसूर्याग्निरूपिणी इडा वामे स्थि-
ता नाडी शुक्ला तु चन्द्ररूपिणी शक्तिरूपा तु सा नाडी
साक्षादमृतविग्रहा पिंगलाख्या च या दक्षे पुंरूपा सू-
र्यविग्रहा दाडिमीकुसुमप्रख्या विषाख्या चापरा स्मृ-
ता मेरुमध्यस्थिता या तु मूलादाब्रह्मरन्ध्रगा सर्व-
तेजोमयी सा तु सुषुम्ना वह्निरूपिणी सुषुम्नान्तर्गता
चित्रा चन्द्रकोटिसमप्रभा सर्वदेवमयी सा तु योगिनां
हृदयंगमा तस्या मध्ये ब्रह्मनाडी मृणालतन्तुरूपि-
णी ब्रह्मरन्ध्रं तन्मध्ये हरवक्त्रात्सदाशिवम् वामा

श्री. त्रै. २.

४०

वर्णक्रमेणैव वेष्टितं विघटन्ते त्वेवन् ब्रह्मग्रन्थिं संस्था
नि षट्पद्मानि यथाक्रमात् आधाराख्यमूलचक्रमति
रक्तं चतुर्दलम् वासान्तवर्णसंयुक्तं रक्तवर्णं मनोहरं
कर्णिकायां स्थिता योनिः कामाख्या परमेश्वरी तद्यो
निः परमेशानि इच्छाज्ञानक्रियात्मिका अपराख्यादि
कन्दर्पमाधारे तत्त्रिकोणके स्वयम्भूलिंगं तन्मध्ये सर
न्ध्रपश्चिमाननम् ध्यायेच्च परमेशानि शिवं श्यामा
लसुन्दरम् तेन मार्गेण कुण्डलिनी यातायातं करो
ति हि भित्वाभित्वा पुरी याति आयाति कुण्डली सदा
तत्र विद्युल्लताकारा कुण्डली परदेवता प्रसुप्तभुज
गाकारा सार्द्धत्रिवलयान्विता शिवं वेष्ट्य महेशानि सर्वे
टा परितिष्ठति येन मार्गेण गन्तव्यं ब्रह्मद्वारं निराम
यम् मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी मूलमा
धारषट्कानां मूलाधारं ततो विदुः लिंगमूले महाप
द्मं स्वाधिष्ठानं तत् षड्दलम् वादिलान्तार्णसंयुक्तं ना
भौ तु मणिपूरकम् डादिफान्तान्वितदलैर्वर्णैर्दशभि
र्युतं हृदये द्वादशारदलैरनाहतसरोरुहं कादिठान्तदलैर्दी
वितं तत् हाटकसन्निभं तन्मध्ये बाणलिंगं तु सूर्यायुत
समविप्रभम् शब्दब्रह्ममयः शब्दोऽनाहतस्तत्र दृश्यते
तेनाहताख्यं तत्पद्मं योगिभिः परिकीर्तितम्

कंठदेशे विशुद्धाख्यं धूम्रवर्णं मनोहरम् अकारादिस्व
रोपेतैर्दलैः षोडशभिर्युतं विशुद्धिस्तन्यते यस्माज्जीवा
त्मा हंसलोकनात् विशुद्धपद्ममाख्यातमाकाशा
ख्यं महाद्भुतं आज्ञानाम भ्रुवोर्मध्ये चक्रं च द्विदलं परं
हलक्षवर्णसंयुक्तं निर्मलं सुमनोहरं इत्याख्यं महा
लिंगं तन्मध्ये कांचनप्रभं आज्ञासंक्रमणं तत्र गुरो
राज्ञेति विश्रुतं कैलासाख्यं ततः ऊर्ध्वं बोधिनी तु तत ऊ
र्ध्वतः तस्मादूर्ध्वमधोमुखेविविकसितं पद्मं सहस्रं ब्र
दम् सहस्रारं महापद्मं नादबिन्दुत्रयान्वितम् अक
थादित्रिरेखाक्षहलक्षत्रयकोणके तन्मध्ये परः
बिन्दुश्च सृष्टिस्थितिलयात्मके वामावर्तेन विलि
खितकथादित्रिकोणकम् शून्यरूपं शिवं साक्षादि
न्दुं परमकुण्डली सार्द्धत्रिवलयाकारा कोटिविद्युत्स
मप्रभा यामले उक्तं कुण्डलिनी शक्तिर्गुणत्रयसम
न्विता शून्यभागे महादेवि शिवशक्त्यात्मकं प्रिये
सर्पाकारा शिवं वेष्ट्य सर्वदा तत्र संस्थिता शिवश
क्त्यात्मकं बिन्दुं भुक्तिमुक्तिफलप्रदं नादरूपेण सा
देवी योनिरूपा सनातनी भूतशुद्धौ शिवविस्त्रा
त्मकं च बिन्दुयोनिस्तु विस्मिते सर्वोपरि महेशानि
बिन्दुं ब्रह्मस्वरूपिणि सर्वो बिन्दुरिति ख्याता भवनंच

त्रिकोणकम् भवनं भवसंबन्धाज्जायते भुवनत्रयम्
इति गन्धर्वमालिकावचनात् पंचभूतानि देवेशि ष
ट्स्थानसमेश्वरि षट्चक्रेषु स्थितान्येव क्रमाद्देवि वि
चिंतयेत् सहस्रारं शिवपुरं सर्वदुःखविवर्जितम्
सर्वतोऽलंकृतैर्दिव्यैर्नित्यपुष्पफलैर्द्रुमैः तत्र मध्ये
शिवपुरं रम्यं कल्पवृक्षसुशोभितम् पंचभूतात्मकं
ब्रह्मगुणत्रयसमन्वितम् चतुःशाखं चतुर्वेदं नित्य
पुष्पफलान्वितम् पीतं कुसुमं तथा श्वेतं रक्तपुष्पं च
पार्वति हरितं च विचित्रं च नानापुष्पमनोहरम् ए
वं कल्पद्रुमं ध्यात्वा तदधो रत्नवेदिकाम् तत्रोपरि
पर्यंकं नानारत्नोपशोभितम् मन्दारपुष्परचितं
नानागन्धानुमोदितम् तत्रोपरि महादेवः सदा तिष्ठ
ति सुन्दरि ध्यायेत्सदाशिवं देवं शुद्धस्फटिकसन्नि
भम् बहुरत्नसमाकीर्णं दीर्घबाहुं मनोहरम् सदा
प्रसन्ननयनं स्मेरास्यमनंतं प्रिये श्रवणे कुण्डलोपे
तं रत्नहारेण शोभितम् शोणपद्मसहस्रेण मालया
शोभितवक्षः अष्टबाहुं त्रिनयनं शिवं पद्मदलेक्षणम्
पादयोर्नूपुरे रम्य शार्दूलचर्ममयं वपुः एवं स्थू
लं वपुस्तस्य भावयेत् कमलेक्षणे पश्य म
ध्ये स्थितं देवं निरीहं प्राहु रूप वत् ॥

शब्दरूपमहादेवे कुर्मंनास्तिकदाचन एवंसर्वेषुचक्रे
षुशक्तिरूपंविचिंतयेत् ब्रह्माहरस्तथाविष्णुरीश्वर
श्चसदाशिवः ततःपरशिवश्चैवषट्शिवाःपरिकी
र्तिताः शक्तिमाह विष्णौहाकिनीदेवीब्रह्मनाहरेतत्र
राकिणी लाकिणीमणिपूरस्थाकाकिनीलिंगगो
चरे आधारेशाकिणीदेवीआज्ञायांहाकिनीतथा
शाकिनीब्रह्मरन्ध्रस्थासर्वकामफलप्रदा ध्येय।
कुण्डलिनीदेवीस्वयंभुलिंगसंस्थिता श्यामांसूक्ष्मां
सृष्टिरूपांसृष्टिस्थितिलयात्मिका विश्वातीतांज्ञा
नरूपांचिंतयेदूर्ध्वरूपिणीं रक्तमितिसुन्दरीविषये
तेयम् हुंकारवर्णसंभूताकुण्डलीपरदेवता विभ
र्तिकुण्डलीदेहमात्मानंहंसमेवततः प्रसृद्धवह्निसं
योगोमनसामारुतेनसह ऊर्ध्वंनयेत्कुण्डलिनींजीवा
त्मसहितांपरां गच्छतिब्रह्मरन्ध्रेणाभित्वाग्रंथिखण्ड
देश षट्चक्रसंधिमार्गेणसुषुम्नावर्त्मनातथा हंसे
नमंत्रेणादेवींसहस्रारंसमानयेत् सदाशिवोमहा
देवोयत्रास्तेपरमेश्वरि तत्रगत्वामहादेवीकुण्डली
परदेवता देवीरूपवतीकामसमुल्लासनिहारिणीं
सुखारविन्दगात्येनमोदितंपरमंशिवं प्रबोध्यपरमे
शानितत्रोपरिवसेत्प्रिये शिवस्यश्रवपत्संरिख्वंतु वा।

कुण्डलीशिवे सदाशिवेन देवेशि तेन मांत्ररमेत्प्रिये
अमृतं जायते देवि तेनामृतेन मे ईश्वरि तत्तद्वामृतैः
देविलालाकारमसमोपमम् तेनामृतेन देवेशि तर्पयेत्स
र्वदेवताम् षट्चक्रदेवतास्तत्र संतर्प्यामृतधारया
आनयेत्तेन मार्गेण मूलाधारं ततः सुधीः यातायातं
क्रमेणैव तत्र कुर्यान्मनोलयम् एवमभ्यासमानस्तत्र
हमहर्निशं भवेत् जरामरणदुःखाद्यैर्मुच्यते भवबन्ध
नात् इत्युक्तं परमं योगं योनिमुद्राप्रबन्धनम् यामले
कुलयोषितं कुलेन सकाशन्नरेव कुलं विशेत् रमते से
यम सकाशन्नरे काकिनी सती संकेतपद्मसाम्य शिवे
कुण्डलिनीशक्तिः पदं हंसः प्रकीर्तितः रूपबिन्दुरिति
ख्यातं रूपातीतं च निष्कलम् एतेन हंस इत्युदाहृतं पदे
वाः पादपद्मयुगं कृत्वा षट्चक्रभेदक्रमेण सहस्रदल
पद्मे नीत्वा चन्द्रमण्डलामृतेनाप्लाव्य तदमृतेन षट्
चक्रक्रमस्य शिवशक्त्यादीनाप्लाव्य सोऽहमिति मं
त्रेण स्वस्थानेनयेदिति तद्वाक्यार्थः सोऽहमिति च मं
त्रेण स्वस्थानमानयेत्सुधीः इति यामलवचनात् दे
व्युवाच देवदेव महादेव सृष्टिस्थित्यंतकारक
मूर्ध्नि पद्म सह स्रारं रक्त वर्ण मयो मुख
म्

तस्य मध्ये स्थितं ध्यायेत्सूक्ष्मं शान्तं सशक्तिकं मूलाधारे
महाशक्तिं कुण्डलीरूपधारिणीं अधोवक्त्रक्रमेणे
व सर्वेषु पद्मेषु भावना तदा कथं भवेत् ब्रह्मचिंतनं तथा हृदे
वयोः आधारे हि स्थितिस्तत्र अधोभागे कथं भवेत्
अधोमुखे स्थितस्यापि चिंतनं वा कथं भवेत् श्रीम
हादेव उवाच यथायुक्तं त्वया देवि कथितं वीरवन्दि
ते एवमेव तु सन्देहो जायते नात्र संशयः कथ्य-
ते परमेशानि सन्देहोच्छेदकारणं तानि पद्मानि
देवेशि सर्वेषां नातः स्थितानि च तन्मध्ये पंकजं देवि मूर्ध
तो मुखमेव च प्रवृत्तिश्च निवृत्तिश्च द्वौ भावौ जीवसं
स्थितौ प्रवृत्तिमार्गसंसारी निवृत्तिः परमात्मनि प्र
वृत्तिर्भावचिंतायामधोवक्त्राणि चिंतयेत् निवृत्ति
योगमार्गेषु सर्वेषां ऊर्ध्वमुखानि च एवमेव भावभेदाद
सन्देहोऽभिजायते इमेतत्कथितं देवि मम ज्ञानवि
लोकितम् । अथातः संप्रवक्ष्यामि शृङ्खलानां च सा
धनम् मूलाधारे स्थितां देवीं कुण्डलीं परदेवताम् भो
गकाले महेशानि आजिह्वांतं विभाव्य च शोधितान्
मत्स्यमांसादीन् मुखे स्थापयेद्बुधः मूलमंत्रं समुच्चा
र्य जुहोमि कुण्डलीमुखे प्रतिग्रासे महेशानि एवं कु
र्याद्विचक्षणः भोजनेच्छा भवेत्तस्य निर्लिप्तो जीवसं

शा
नं
२३

23

त्रकः एवमेवप्रकारेणऊर्ध्वपद्मंप्रजायते गुरोःस्थि
तिंचवार्द्धयितथासम्यक्प्रजायते भिद्यतेहृदयग्रं।
थिःछिद्यतेसर्वसंशयः गुर्वादिभावनादेवितदासि
द्धिःप्रजायते स्वगेद्वायंसमस्ताभिद्यामटतितुगतिः
अतएवमहेशानिचाञ्चल्यंप्रजायते इत्येतत्कथि
तंसारंममज्ञानविलोकितं । अथयोगांगवक्ष्यामियेन
देवमयोभवेत् मूलपद्मेकुण्डलिनीयावन्निद्रायिता
प्रभो तावत्किंचिन्नसिद्धेतमंत्रयंत्रार्चनादिकं स्वाप
कालेवामवाहः प्रबोधेदक्षिणवहः मंत्रिणांस्वा।
पकालेतुजपोऽनर्थफलप्रदः प्रबोधकालेजानीया
दुभयोरपिपार्ह्वति जागर्त्तियदिसादेविवह्निभिःपुणए
मचैयः तदाप्रसादमायांतिमंत्रयंत्रार्चनादयः योगा।
योगाद्भवेन्मुक्तिंमंत्रसिद्धिरखण्डिता सिद्धेमनोपरा
वाप्तिरितिशास्त्रस्यनिर्णयः जीवन्मुक्तस्यदेहान्तेपरं
निर्वाणमाप्नुयात् संसारोत्तारणंमुक्तिर्योगशब्देन
कथ्यते प्राणायामैर्जपैर्ध्यानैर्गस्मक्रनिद्राजगन्मयी
चतुर्दलेस्याद्याधारंस्वाधिष्ठानेतुषड्दलम् नाभौदशद
लंपद्मंसूर्यसंख्यादलंहृदि कंठेस्यात्षोडशदलंभ्रूम
ध्येद्विदलंतथा सहस्रदलमाख्यातंब्रह्मरन्ध्रेमहापथे।
थेः मातृकाक्षरसंभूतंसहस्रारंसरोरुहम् अथोवक्ष्ये

शुक्लवर्णोरक्तः किं तल्लक्ष्मभूषितं इति वर्णोमन्त्रो विशेष
णोक्तम् समयातंत्रोक्तत्वात् अन्यथाविरोधापत्तेः ब
ह्माविष्णुरुद्रश्चईश्वरश्चसदाशिवः ततः परशिवश्चै
व षट्शिवाः परिकीर्तिताः डाकिनी राकिनी चैव शा
किनी लाकिनी तथा काकिनी हाकिनी चैव षट्शक्तिरे
षाप्रकीर्तिता आधारे लिङ्गदेशे च भ्रुवोर्मध्ये विशेषतः
स्वयंभूसंज्ञो बाणाख्यस्तथैवेतरसंज्ञकः लिंगत्रयम
हेशानि प्रयानतत्वेन चिंतयेत् मूलाधारे स्थिता भूमिः
स्वाधिष्ठाने जलं प्रिये मणिपूरे स्थितं तेजो हृदये मा
रुतस्तथा विशुद्धौ तु महेशानि आकाशं कमलेत्वाणे
आज्ञाचक्रे महेशानि मनः सर्वार्थसाधकम् तदूर्द्धं पर
मेशानि पद्ममूर्द्धं भ्रुवि सदा तत्रोपरि महेशानि ध्यायेत्
सदाशिवप्रभुम् ऊर्द्धभ्रुवोरिति अथो भ्रुवि सहस्रद
